# Saundaryalahari

# સૌન્દર્યલહરી

## Document Information

Text title : Saundaryalahari

File name : saundaryalahari.itx

Category : laharI, devii, shankarAchArya, devI, dashamahAvidyA

Location : doc_devii

Author : Shankaracharya

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Sunder Hattangadi sunder at hotmail.com

Latest update : September 3, 1997, July 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 8, 2025

*sanskritdocuments.org*

# સૌન્દર્યલહરી

આનન્દલહરી (૧-૪૦)
શિવઃ શક્ત્યા યુક્તો યદિ ભવતિ શક્તઃ પ્રભવિતું
ન ચેદેવં દેવો ન ખલુ કુશલઃ સ્પન્દિતુમપિ ।
અતસ્ત્વામારાધ્યાં હરિહરવિરિઞ્ચાદિભિરપિ
પ્રણન્તું સ્તોતું વા કથમકૃતપુણ્યઃ પ્રભવતિ ॥ ૧॥

તનીયાંસં પાંસું તવ ચરણપઙ્કેરુહભવં
વિરિઞ્ચિસ્સઞ્ચિન્વન્ વિરચયતિ લોકાનવિકલમ્ ।
વહત્યેનં શૌરિઃ કથમપિ સહસ્રેણ શિરસાં
હરસ્સંક્ષુદ્યૈનં ભજતિ ભસિતોદ્ધૂલનવિધિમ્ ॥ ૨॥

અવિદ્યાનામન્ત-સ્તિમિર-મિહિરદ્વીપનગરી
જડાનાં ચૈતન્ય-સ્તબક-મકરન્દ-સ્રુતિઝરી ।
દરિદ્રાણાં ચિન્તામણિગુણનિકા જન્મજલધૌ
નિમગ્નાનાં દંષ્ટ્રા મુરરિપુ-વરાહસ્ય ભવતિ ॥ ૩॥

ત્વદન્યઃ પાણિભ્યામભયવરદો દૈવતગણઃ
ત્વમેકા નૈવાસિ પ્રકટિતવરાભીત્યભિનયા ।
ભયાત્ ત્રાતું દાતું ફલમપિ ચ વાઞ્છાસમધિકં
શરણ્યે લોકાનાં તવ હિ ચરણાવેવ નિપુણૌ ॥ ૪॥

હરિસ્ત્વામારાધ્ય પ્રણતજનસૌભાગ્યજનનીં
પુરા નારી ભૂત્વા પુરરિપુમપિ ક્ષોભમનયત્ ।
સ્મરોઽપિ ત્વાં નત્વા રતિનયનલેહ્યેન વપુષા
મુનીનામપ્યન્તઃ પ્રભવતિ હિ મોહાય મહતામ્ ॥ ૫॥

ધનુઃ પૌષ્પં મૌર્વી મધુકરમયી પઞ્ચ વિશિખાઃ
વસન્તઃ સામન્તો મલયમરુદાયોધનરથઃ ।
તથાપ્યેકઃ સર્વં હિમગિરિસુતે કામપિ કૃપામ્

અપાઙ્ગાત્તે લબ્ધ્વા જગદિદ-મનઙ્ગો વિજયતે ॥ ૬॥

ક્વણત્કાઞ્ચીદામા કરિકલભકુમ્ભસ્તનનતા
પરિક્ષીણા મધ્યે પરિણતશરચ્ચન્દ્રવદના ।
ધનુર્બાણાન્ પાશં સૃણિમપિ દધાના કરતલૈઃ
પુરસ્તાદાસ્તાં નઃ પુરમથિતુરાહોપુરુષિકા ॥ ૭॥

સુધાસિન્ધોર્મધ્યે સુરવિટપિવાટીપરિવૃતે
મણિદ્વીપે નીપોપવનવતિ ચિન્તામણિગૃહે ।
શિવાકારે મઞ્ચે પરમશિવપર્યઙ્કનિલયાં
ભજન્તિ ત્વાં ધન્યાઃ કતિચન ચિદાનન્દલહરીમ્ ॥ ૮॥

મહીં મૂલાધારે કમપિ મણિપૂરે હુતવહં
સ્થિતં સ્વાધિષ્ઠાને હૃદિ મરુતમાકાશમુપરિ ।
મનોઽપિ ભ્રૂમધ્યે સકલમપિ ભિત્વા કુલપથં
સહસ્રારે પદ્મે સહ રહસિ પત્યા વિહરસે ॥ ૯॥

સુધાધારાસારૈશ્ચરણયુગલાન્તર્વિગલિતૈઃ
પ્રપઞ્ચં સિઞ્ચન્તી પુનરપિ રસામ્નાયમહસઃ ।
અવાપ્ય સ્વાં ભૂમિં ભુજગનિભમધ્યુષ્ટવલયં
સ્વમાત્માનં કૃત્વા સ્વપિષિ કુલકુણ્ડે કુહરિણિ ॥ ૧૦॥

ચતુર્ભિઃ શ્રીકણ્ઠૈઃ શિવયુવતિભિઃ પઞ્ચભિરપિ
પ્રભિન્નાભિઃ શમ્ભોર્નવભિરપિ મૂલપ્રકૃતિભિઃ ।
ચતુશ્ચત્વારિંશદ્વસુદલકલાશ્રત્રિવલય- (ત્રયશ્ચત્વારિ)
ત્રિરેખાભિઃ સાર્ધં તવ શરણકોણાઃ પરિણતાઃ ॥ ૧૧॥ (ચરણકોણાઃ, ભવનકોણાઃ)

ત્વદીયં સૌન્દર્યં તુહિનગિરિકન્યે તુલયિતું
કવીન્દ્રાઃ કલ્પન્તે કથમપિ વિરિઞ્ચિપ્રભૃતયઃ ।
યદાલોકૌત્સુક્યાદમરલલના યાન્તિ મનસા
તપોભિર્દુષ્પ્રાપામપિ ગિરિશસાયુજ્યપદવીમ્ ॥ ૧૨॥

નરં વર્ષીયાંસં નયનવિરસં નર્મસુ જડં
તવાપાઙ્ગાલોકે પતિતમનુધાવન્તિ શતશઃ ।
ગલદ્વેણીબન્ધાઃ કુચકલશવિસ્રસ્તસિચયા
હઠાત્ ત્રુટ્યત્કાઞ્ચ્યો વિગલિતદુકૂલા યુવતયઃ ॥ ૧૩॥

ક્ષિતૌ ષટ્પઞ્ચાશદ્ દ્વિસમધિકપઞ્ચાશદુદકે
હુતાશે દ્વાષષ્ટિશ્ચતુરધિકપઞ્ચાશદનિલે ।
દિવિ દ્વિષ્ષટ્ત્રિંશન્મનસિ ચ ચતુષ્ષષ્ટિરિતિ યે
મયૂખાસ્તેષામપ્યુપરિ તવ પાદામ્બુજયુગમ્ ॥ ૧૪॥

શરજ્જ્યોત્સ્નાશુદ્ધાં શશિયુતજટાજૂટમકુટાં
વરત્રાસત્રાણસ્ફટિકઘટિકાપુસ્તકકરામ્ ।
સકૃન્ન ત્વા નત્વા કથમિવ સતાં સંન્નિદધતે
મધુક્ષીરદ્રાક્ષામધુરિમધુરીણાઃ ભણિતયઃ ॥ ૧૫॥ var ફણિતયઃ
કવીન્દ્રાણાં ચેતઃકમલવનબાલાતપરુચિં
ભજન્તે યે સન્તઃ કતિચિદરુણામેવ ભવતીમ્ ।
વિરિઞ્ચિપ્રેયસ્યાસ્તરુણતરશૃઙ્ગારલહરી-
ગભીરાભિર્વાગ્ભિર્વિદધતિ સતાં રઞ્જનમમી ॥ ૧૬॥

સવિત્રીભિર્વાચાં શશિમણિશિલાભઙ્ગરુચિભિઃ
વશિન્યાદ્યાભિસ્ત્વાં સહ જનનિ સંચિન્તયતિ યઃ ।
સ કર્તા કાવ્યાનાં ભવતિ મહતાં ભઙ્ગિરુચિભિઃ
વચોભિર્વાગ્દેવીવદનકમલામોદમધુરૈઃ ॥ ૧૭॥

તનુચ્છાયાભિસ્તે તરુણતરણિશ્રીસરણિભિઃ
દિવં સર્વામુર્વીમરુણિમનિ મગ્નાં સ્મરતિ યઃ ।
ભવન્ત્યસ્ય ત્રસ્યદ્વનહરિણશાલીનનયનાઃ
સહોર્વશ્યા વશ્યાઃ કતિ કતિ ન ગીર્વાણગણિકાઃ ॥ ૧૮॥

મુખં બિન્દું કૃત્વા કુચયુગમધસ્તસ્ય તદધો
હરાર્ધં ધ્યાયેદ્યો હરમહિષિ તે મન્મથકલામ્ ।
સ સદ્યઃ સંક્ષોભં નયતિ વનિતા ઇત્યતિલઘુ
ત્રિલોકીમપ્યાશુ ભ્રમયતિ રવીન્દુસ્તનયુગામ્ ॥ ૧૯॥

કિરન્તીમઙ્ગેભ્યઃ કિરણનિકુરમ્બામૃતરસં
હૃદિ ત્વામાધત્તે હિમકરશિલામૂર્તિમિવ યઃ ।
સ સર્પાણાં દર્પં શમયતિ શકુન્તાધિપ ઇવ
જ્વરપ્લુષ્ટાન્ દૃષ્ટ્યા સુખયતિ સુધાધારસિરયા ॥ ૨૦॥

તટિલ્લેખાતન્વીં તપનશશિવૈશ્વાનરમયીં
નિષણ્ણાં ષણ્ણામપ્યુપરિ કમલાનાં તવ કલામ્ ।

મહાપદ્માટવ્યાં મૃદિતમલમાયેન મનસા
મહાન્તઃ પશ્યન્તો દધતિ પરમાહ્લાદલહરીમ્ ॥ ૨૧॥

ભવાનિ ત્વં દાસે મયિ વિતર દૃષ્ટિં સકરુણા-
મિતિ સ્તોતું વાઞ્છન્ કથયતિ ભવાનિ ત્વમિતિ યઃ ।
તદૈવ ત્વં તસ્મૈ દિશસિ નિજસાયુજ્યપદવીં
મુકુન્દબ્રહ્મેન્દ્રસ્ફુટમકુટનીરાજિતપદામ્ ॥ ૨૨॥

ત્વયા હૃત્વા વામં વપુરપરિતૃપ્તેન મનસા
શરીરાર્ધં શમ્ભોરપરમપિ શઙ્કે હૃતમભૂત્ ।
યદેતત્ત્વદ્રૂપં સકલમરુણાભં ત્રિનયનં
કુચાભ્યામાનમ્રં કુટિલશશિચૂડાલમકુટમ્ ॥ ૨૩॥

જગત્સૂતે ધાતા હરિરવતિ રુદ્રઃ ક્ષપયતે
તિરસ્કુર્વન્નેતત્સ્વમપિ વપુરીશસ્તિરયતિ ।
સદાપૂર્વઃ સર્વં તદિદમનુગૃહ્ણાતિ ચ શિવ-
સ્તવાજ્ઞામાલમ્બ્ય ક્ષણચલિતયોર્ભ્રૂલતિકયોઃ ॥ ૨૪॥

ત્રયાણાં દેવાનાં ત્રિગુણજનિતાનાં તવ શિવે
ભવેત્ પૂજા પૂજા તવ ચરણયોર્યા વિરચિતા ।
તથા હિ ત્વત્પાદોદ્વહનમણિપીઠસ્ય નિકટે
સ્થિતા હ્યેતે શશ્વન્મુકુલિતકરોત્તંસમકુટાઃ ॥ ૨૫॥

વિરિઞ્ચિઃ પઞ્ચત્વં વ્રજતિ હરિરાપ્નોતિ વિરતિં
વિનાશં કીનાશો ભજતિ ધનદો યાતિ નિધનમ્ ।
વિતન્દ્રી માહેન્દ્રી વિતતિરપિ સંમીલિતદૃશા
મહાસંહારેઽસ્મિન્ વિહરતિ સતિ ત્વત્પતિરસૌ ॥ ૨૬॥

જપો જલ્પઃ શિલ્પં સકલમપિ મુદ્રાવિરચના
ગતિઃ પ્રાદક્ષિણ્યક્રમણમશનાદ્યાહુતિવિધિઃ ।
પ્રણામસ્સંવેશસ્સુખમખિલમાત્માર્પણદૃશા
સપર્યાપર્યાયસ્તવ ભવતુ યન્મે વિલસિતમ્ ॥ ૨૭॥

સુધામપ્યાસ્વાદ્ય પ્રતિભયજરામૃત્યુહરિણીં
વિપદ્યન્તે વિશ્વે વિધિશતમખાદ્યા દિવિષદઃ ।
કરાલં યત્ક્ષ્વેલં કબલિતવતઃ કાલકલના
ન શમ્ભોસ્તન્મૂલં તવ જનનિ તાટઙ્કમહિમા ॥ ૨૮॥

કિરીટં વૈરિઞ્ચં પરિહર પુરઃ કૈટભભિદઃ
કઠોરે કોટીરે સ્ખલસિ જહિ જમ્ભારિમુકુટમ્ ।
પ્રણમ્રેષ્વેતેષુ પ્રસભમુપયાતસ્ય ભવનં
ભવસ્યાભ્યુત્થાને તવ પરિજનોક્તિર્વિજયતે ॥ ૨૯॥

સ્વદેહોદ્ભૂતાભિર્ઘૃણિભિરણિમાદ્યાભિરભિતો
નિષેવ્યે નિત્યે ત્વામહમિતિ સદા ભાવયતિ યઃ ।
કિમાશ્ચર્યં તસ્ય ત્રિનયનસમૃદ્ધિં તૃણયતો
મહાસંવર્તાગ્નિર્વિરચયતિ નીરાજનવિધિમ્ ॥ ૩૦॥

ચતુષ્ષષ્ટ્યા તન્ત્રૈઃ સકલમતિસંધાય ભુવનં
સ્થિતસ્તત્તત્સિદ્ધિપ્રસવપરતન્ત્રૈઃ પશુપતિઃ ।
પુનસ્ત્વન્નિર્બન્ધાદખિલપુરુષાર્થૈકઘટના-
સ્વતન્ત્રં તે તન્ત્રં ક્ષિતિતલમવાતીતરદિદમ્ ॥ ૩૧॥

શિવઃ શક્તિઃ કામઃ ક્ષિતિરથ રવિઃ શીતકિરણઃ
સ્મરો હંસઃ શક્રસ્તદનુ ચ પરામારહરયઃ ।
અમી હૃલ્લેખાભિસ્તિસૃભિરવસાનેષુ ઘટિતા
ભજન્તે વર્ણાસ્તે તવ જનનિ નામાવયવતામ્ ॥ ૩૨॥

સ્મરં યોનિં લક્ષ્મીં ત્રિતયમિદમાદૌ તવ મનો-
ર્નિધાયૈકે નિત્યે નિરવધિમહાભોગરસિકાઃ ।
ભજન્તિ ત્વાં ચિન્તામણિગુનનિબદ્ધાક્ષવલયાઃ
શિવાગ્નૌ જુહ્વન્તઃ સુરભિઘૃતધારાહુતિશતૈઃ ॥ ૩૩॥

શરીરં ત્વં શમ્ભોઃ શશિમિહિરવક્ષોરુહયુગં
તવાત્માનં મન્યે ભગવતિ નવાત્માનમનઘમ્ ।
અતશ્શેષશ્શેષીત્યયમુભયસાધારણતયા
સ્થિતઃ સંબન્ધો વાં સમરસપરાનન્દપરયોઃ ॥ ૩૪॥

મનસ્ત્વં વ્યોમ ત્વં મરુદસિ મરુત્સારથિરસિ
ત્વમાપસ્ત્વં ભૂમિસ્ત્વયિ પરિણતાયાં ન હિ પરમ્ ।
ત્વમેવ સ્વાત્માનં પરિણમયિતું વિશ્વવપુષા
ચિદાનન્દાકારં શિવયુવતિ ભાવેન બિભૃષે ॥ ૩૫॥

તવાજ્ઞાચક્રસ્થં તપનશશિકોટિદ્યુતિધરં

પરં શમ્ભું વન્દે પરિમિલિતપાર્શ્વં પરચિતા ।
યમારાધ્યન્ ભક્ત્યા રવિશશિશુચીનામવિષયે
નિરાલોકેઽલોકે નિવસતિ હિ ભાલોકભુવને ॥ ૩૬॥

વિશુદ્ધૌ તે શુદ્ધસ્ફટિકવિશદં વ્યોમજનકં
શિવં સેવે દેવીમપિ શિવસમાનવ્યવસિતામ્ ।
યયોઃ કાન્ત્યા યાન્ત્યાઃ શશિકિરણસારૂપ્યસરણે-
વિધૂતાન્તર્ધ્વાન્તા વિલસતિ ચકોરીવ જગતી ॥ ૩૭॥

સમુન્મીલત્ સંવિત્ કમલમકરન્દૈકરસિકં
ભજે હંસદ્વન્દ્વં કિમપિ મહતાં માનસચરમ્ ।
યદાલાપાદષ્ટાદશગુણિતવિદ્યાપરિણતિ-
ર્યદાદત્તે દોષાદ્ ગુણમખિલમદ્ભ્યઃ પય ઇવ ॥ ૩૮॥

તવ સ્વાધિષ્ઠાને હુતવહમધિષ્ઠાય નિરતં
તમીડે સંવર્તં જનનિ મહતીં તાં ચ સમયામ્ ।
યદાલોકે લોકાન્ દહતિ મહતિ ક્રોધકલિતે
દયાર્દ્રા યા દૃષ્ટિઃ શિશિરમુપચારં રચયતિ ॥ ૩૯॥

તટિત્ત્વન્તં શક્ત્યા તિમિરપરિપન્થિસ્ફુરણયા
સ્ફુરન્નાનારત્નાભરણપરિણદ્ધેન્દ્રધનુષમ્ ।
તવ શ્યામં મેઘં કમપિ મણિપૂરૈકશરણં
નિષેવે વર્ષન્તં હરમિહિરતપ્તં ત્રિભુવનમ્ ॥ ૪૦॥

તવાધારે મૂલે સહ સમયયા લાસ્યપરયા
નવાત્માનં મન્યે નવરસમહાતાણ્ડવનટમ્ ।
ઉભાભ્યામેતાભ્યામુદયવિધિમુદ્દિશ્ય દયયા
સનાથાભ્યાં જજ્ઞે જનકજનનીમજ્જગદિદમ્ ॥ ૪૧॥

સૌન્દર્યલહરી
ગતૈર્માણિક્યત્વં ગગનમણિભિઃ સાન્દ્રઘટિતં
કિરીટં તે હૈમં હિમગિરિસુતે કીર્તયતિ યઃ ।
સ નીડેયચ્છાયાચ્છુરણશબલં ચન્દ્રશકલં
ધનુઃ શૌનાસીરં કિમિતિ ન નિબધ્નાતિ ધિષણામ્ ॥ ૪૨॥

ધુનોતુ ધ્વાન્તં નસ્તુલિતદલિતેન્દીવરવનં
ઘનસ્નિગ્ધશ્લક્ષ્ણં ચિકુરનિકુરુમ્બં તવ શિવે ।

યદીયં સૌરભ્યં સહજમુપલબ્ધું સુમનસો
વસન્ત્યસ્મિન્ મન્યે વલમથનવાટીવિટપિનામ્ ॥ ૪૩॥

તનોતુ ક્ષેમં નસ્તવ વદનસૌન્દર્યલહરી-
પરીવાહસ્રોતઃસરણિરિવ સીમન્તસરણિઃ ।
વહન્તી સિન્દૂરં પ્રબલકબરીભારતિમિર-
દ્વિષાં વૃન્દૈર્બન્દીકૃતમિવ નવીનાર્કકિરણમ્ ॥ ૪૪॥

અરાલૈઃ સ્વાભાવ્યાદલિકલભસશ્રીભિરલકૈઃ
પરીતં તે વક્ત્રં પરિહસતિ પઙ્કેરુહરુચિમ્ ।
દરસ્મેરે યસ્મિન્ દશનરુચિકિઞ્જલ્કરુચિરે
સુગન્ધૌ માદ્યન્તિ સ્મરદહનચક્ષુર્મધુલિહઃ ॥ ૪૫॥

લલાટં લાવણ્યદ્યુતિવિમલમાભાતિ તવ ય-
દ્વિતીયં તન્મન્યે મકુટઘટિતં ચન્દ્રશકલમ્ ।
વિપર્યાસન્યાસાદુભયમપિ સંભૂય ચ મિથઃ
સુધાલેપસ્યૂતિઃ પરિણમતિ રાકાહિમકરઃ ॥ ૪૬॥

ભ્રુવૌ ભુગ્ને કિંચિદ્ભુવનભયભઙ્ગવ્યસનિનિ
ત્વદીયે નેત્રાભ્યાં મધુકરરુચિભ્યાં ધૃતગુણમ્ ।
ધનુર્મન્યે સવ્યેતરકરગૃહીતં રતિપતેઃ
પ્રકોષ્ઠે મુષ્ટૌ ચ સ્થગયતિ નિગૂઢાન્તરમુમે ॥ ૪૭॥

અહઃ સૂતે સવ્યં તવ નયનમર્કાત્મકતયા
ત્રિયામાં વામં તે સૃજતિ રજનીનાયકતયા ।
તૃતીયા તે દૃષ્ટિર્દરદલિતહેમામ્બુજરુચિઃ
સમાધત્તે સંધ્યાં દિવસનિશયોરન્તરચરીમ્ ॥ ૪૮॥

વિશાલા કલ્યાણી સ્ફુટરુચિરયોધ્યા કુવલયૈઃ
કૃપાધારાધારા કિમપિ મધુરાભોગવતિકા ।
અવન્તી દૃષ્ટિસ્તે બહુનગરવિસ્તારવિજયા
ધ્રુવં તત્તન્નામવ્યવહરણયોગ્યા વિજયતે ॥ ૪૯॥

કવીનાં સંદર્ભસ્તબકમકરન્દૈકરસિકં
કટાક્ષવ્યાક્ષેપભ્રમરકલભૌ કર્ણયુગલમ્ ।
અમુઞ્ચન્તૌ દૃષ્ટ્વા તવ નવરસાસ્વાદતરલા-
વસૂયાસંસર્ગાદલિકનયનં કિંચિદરુણમ્ ॥ ૫૦॥

શિવે શ‌ૃઙ્ગારાર્દ્રા તદિતરજને કુત્સનપરા
સરોષા ગઙ્ગાયાં ગિરિશચરિતે વિસ્મયવતી । (ગિરિશનયને)
હરાહિભ્યો ભીતા સરસિરુહસૌભાગ્યજનની (જયિની)
સખીષુ સ્મેરા તે મયિ જનની દૃષ્ટિઃ સકરુણા ॥ ૫૧॥

ગતે કર્ણાભ્યર્ણં ગરુત ઇવ પક્ષ્માણિ દધતી
પુરાં ભેત્તુશ્ચિત્તપ્રશમરસવિદ્રાવણફલે ।
ઇમે નેત્રે ગોત્રાધરપતિકુલોત્તંસકલિકે
તવાકર્ણાકૃષ્ટસ્મરશરવિલાસં કલયતઃ ॥ ૫૨॥

વિભક્તત્રૈવર્ણ્યં વ્યતિકરિતલીલાઞ્જનતયા
વિભાતિ ત્વન્નેત્રત્રિતયમિદમીશાનદયિતે ।
પુનઃ સ્રષ્ટું દેવાન્ દ્રુહિણહરિરુદ્રાનુપરતાન્
રજઃ સત્ત્વં બિભ્રત્તમ ઇતિ ગુણાનાં ત્રયમિવ ॥ ૫૩॥

પવિત્રીકર્તું નઃ પશુપતિપરાધીનહૃદયે
દયામિત્રૈર્નેત્રૈરરુણધવલશ્યામરુચિભિઃ ।
નદઃ શોણો ગઙ્ગા તપનતનયેતિ ધ્રુવમમું
ત્રયાણાં તીર્થાનામુપનયસિ સંભેદમનઘમ્ ॥ ૫૪॥

નિમેષોન્મેષાભ્યાં પ્રલયમુદયં યાતિ જગતી
તવેત્યાહુઃ સન્તો ધરણિધરરાજન્યતનયે ।
ત્વદુન્મેષાજ્જાતં જગદિદમશેષં પ્રલયતઃ
પરિત્રાતું શઙ્કે પરિહૃતનિમેષાસ્તવ દૃશઃ ॥ ૫૫॥

તવાપર્ણે કર્ણેજપનયનપૈશુન્યચકિતા
નિલીયન્તે તોયે નિયતમનિમેષાઃ શફરિકાઃ ।
ઇયં ચ શ્રીર્બદ્ધચ્છદપુટકવાટં કુવલયમ્
જહાતિ પ્રત્યૂષે નિશિ ચ વિઘટય્ય પ્રવિશતિ ॥ ૫૬॥

દૃશા દ્રાઘીયસ્યા દરદલિતનીલોત્પલરુચા
દવીયાંસં દીનં સ્નપય કૃપયા મામપિ શિવે ।
અનેનાયં ધન્યો ભવતિ ન ચ તે હાનિરિયતા
વને વા હર્મ્યે વા સમકરનિપાતો હિમકરઃ ॥ ૫૭॥

અરાલં તે પાલીયુગલમગરાજન્યતનયે

ન કેષામાધત્તે કુસુમશરકોદણ્ડકુતુકમ્ ।
તિરશ્ચીનો યત્ર શ્રવણપથમુલ્લઙ્ઘ્ય વિલસ-
ન્નપાઙ્ગવ્યાસઙ્ગો દિશતિ શરસંધાનધિષણામ્ ॥ ૫૮॥

સ્ફુરદ્ગણ્ડાભોગપ્રતિફલિતતાટઙ્કયુગલં
ચતુશ્ચક્રં મન્યે તવ મુખમિદં મન્મથરથમ્ ।
યમારુહ્ય દ્રુહ્યત્યવનિરથમર્કેન્દુચરણં
મહાવીરો મારઃ પ્રમથપતયે સજ્જિતવતે ॥ ૫૯॥

સરસ્વત્યાઃ સૂક્તીરમૃતલહરીકૌશલહરીઃ
પિબન્ત્યાઃ શર્વાણિ શ્રવણચુલુકાભ્યામવિરલમ્ ।
ચમત્કારશ્લાઘાચલિતશિરસઃ કુણ્ડલગણો
ઝણત્કારૈસ્તારૈઃ પ્રતિવચનમાચષ્ટ ઇવ તે ॥ ૬૦॥

અસૌ નાસાવંશસ્તુહિનગિરિવંશધ્વજપટિ
ત્વદીયો નેદીયઃ ફલતુ ફલમસ્માકમુચિતમ્ ।
વહન્નન્તર્મુક્તાઃ શિશિરતરનિશ્વાસગલિતં
સમૃદ્ધ્યા યત્તાસાં બહિરપિ ચ મુક્તામણિધરઃ ॥ ૬૧॥

પ્રકૃત્યા રક્તાયાસ્તવ સુદતિ દન્તચ્છદરુચેઃ
પ્રવક્ષ્યે સાદૃશ્યં જનયતુ ફલં વિદ્રુમલતા ।
ન બિમ્બં તદ્બિમ્બપ્રતિફલનરાગાદરુણિતં
તુલામધ્યારોઢું કથમિવ વિલજ્જેત કલયા ॥ ૬૨॥

સ્મિતજ્યોત્સ્નાજાલં તવ વદનચન્દ્રસ્ય પિબતાં
ચકોરાણામાસીદતિરસતયા ચઞ્ચુજડિમા ।
અતસ્તે શીતાંશોરમૃતલહરીમમ્લરુચયઃ
પિબન્તિ સ્વચ્છન્દં નિશિ નિશિ ભૃશં કાઞ્જિકધિયા ॥ ૬૩॥

અવિશ્રાન્તં પત્યુર્ગુણગણકથામ્રેડનજપા
જપાપુષ્પચ્છાયા તવ જનનિ જિહ્વા જયતિ સા ।
યદગ્રાસીનાયાઃ સ્ફટિકદૃષદચ્છચ્છવિમયી
સરસ્વત્યા મૂર્તિઃ પરિણમતિ માણિક્યવપુષા ॥ ૬૪॥

રણે જિત્વા દૈત્યાનપહૃતશિરસ્ત્રૈઃ કવચિભિર્-
નિવૃત્તૈશ્ચણ્ડાંશત્રિપુરહરનિર્માલ્યવિમુખૈઃ ।
વિશાખેન્દ્રોપેન્દ્રૈઃ શશિવિશદકર્પૂરશકલા

વિલીયન્તે માતસ્તવ વદનતામ્બૂલકબલાઃ ॥ ૬૫॥

વિપઞ્ચ્યા ગાયન્તી વિવિધમપદાનં પશુપતેઃ
ત્વયારબ્ધે વક્તું ચલિતશિરસા સાધુવચને ।
તદીયૈર્માધુર્યૈરપલપિતતન્ત્રીકલરવાં
નિજાં વીણાં વાણી નિચુલયતિ ચોલેન નિભૃતમ્ ॥ ૬૬॥

કરાગ્રેણ સ્પૃષ્ટં તુહિનગિરિણા વત્સલતયા
ગિરીશેનોદસ્તં મુહુરધરપાનાકુલતયા ।
કરગ્રાહ્યં શમ્ભોર્મુખમુકુરવૃન્તં ગિરિસુતે
કથઙ્કારં બ્રૂમસ્તવ ચિબુકમૌપમ્યરહિતમ્ ॥ ૬૭॥

ભુજાશ્લેષાન્નિત્યં પુરદમયિતુઃ કણ્ટકવતી
તવ ગ્રીવા ધત્તે મુખકમલનાલશ્રિયમિયમ્ ।
સ્વતઃ શ્વેતા કાલાગુરુબહુલજમ્બાલમલિના
મૃણાલીલાલિત્યમ્ વહતિ યદધો હારલતિકા ॥ ૬૮॥

ગલે રેખાસ્તિસ્રો ગતિગમકગીતૈકનિપુણે
વિવાહવ્યાનદ્ધપ્રગુણગુણસંખ્યાપ્રતિભુવઃ ।
વિરાજન્તે નાનાવિધમધુરરાગાકરભુવાં
ત્રયાણાં ગ્રામાણાં સ્થિતિનિયમસીમાન ઇવ તે ॥ ૬૯॥

મૃણાલીમૃદ્વીનાં તવ ભુજલતાનાં ચતસૃણાં
ચતુર્ભિઃ સૌન્દર્યં સરસિજભવઃ સ્તૌતિ વદનૈઃ ।
નખેભ્યઃ સન્ત્રસ્યન્ પ્રથમમથનાદન્ધકરિપો-
શ્ચતુર્ણાં શીર્ષાણાં સમમભયહસ્તાર્પણધિયા ॥ ૭૦॥

નખાનામુદ્દ્યોતૈર્નવનલિનરાગં વિહસતાં
કરાણાં તે કાન્તિં કથય કથયામઃ કથમુમે ।
કયાચિદ્વા સામ્યં ભજતુ કલયા હન્ત કમલં
યદિ ક્રીડલ્લક્ષ્મીચરણતલલાક્ષારુણદલમ્ ॥ ૭૧॥

સમં દેવિ સ્કન્દદ્વિપવદનપીતં સ્તનયુગં
તવેદં નઃ ખેદં હરતુ સતતં પ્રસ્નુતમુખમ્ ।
યદાલોક્યાશઙ્કાકુલિતહૃદયો હાસજનકઃ
સ્વકુમ્ભૌ હેરમ્બઃ પરિમૃશતિ હસ્તેન ઝડિતિ ॥ ૭૨॥

અમૂ તે વક્ષોજાવમૃતરસમાણિક્યકુતુપૌ
ન સંદેહસ્પન્દો નગપતિપતાકે મનસિ નઃ ।
પિબન્તૌ તૌ યસ્માદવિદિતવધૂસઙ્ગરસિકૌ
કુમારાવદ્યાપિ દ્વિરદવદનક્રૌઞ્ચદલનૌ ॥ ૭૩॥

વહત્યમ્બ સ્તમ્બેરમદનુજકુમ્ભપ્રકૃતિભિઃ
સમારબ્ધાં મુક્તામણિભિરમલાં હારલતિકામ્ ।
કુચાભોગો બિમ્બાધરરુચિભિરન્તઃ શબલિતાં
પ્રતાપવ્યામિશ્રાં પુરદમયિતુઃ કીર્તિમિવ તે ॥ ૭૪॥

તવ સ્તન્યં મન્યે ધરણિધરકન્યે હૃદયતઃ
પયઃપારાવારઃ પરિવહતિ સારસ્વતમિવ ।
દયાવત્યા દત્તં દ્રવિડશિશુરાસ્વાદ્ય તવ યત્
કવીનાં પ્રૌઢાનામજનિ કમનીયઃ કવયિતા ॥ ૭૫॥

હરક્રોધજ્વાલાવલિભિરવલીઢેન વપુષા
ગભીરે તે નાભીસરસિ કૃતસઙ્ગો મનસિજઃ ।
સમુત્તસ્થૌ તસ્માદચલતનયે ધૂમલતિકા
જનસ્તાં જાનીતે તવ જનનિ રોમાવલિરિતિ ॥ ૭૬॥

યદેતત્ કાલિન્દીતનુતરતરઙ્ગાકૃતિ શિવે
કૃશે મધ્યે કિંચિજ્જનનિ તવ યદ્ભાતિ સુધિયામ્ ।
વિમર્દાદન્યોઽન્યં કુચકલશયોરન્તરગતં
તનૂભૂતં વ્યોમ પ્રવિશદિવ નાભિં કુહરિણીમ્ ॥ ૭૭॥

સ્થિરો ગઙ્ગાવર્તઃ સ્તનમુકુલરોમાવલિલતા-
કલાવાલં કુણ્ડં કુસુમશરતેજોહુતભુજઃ ।
રતેર્લીલાગારં કિમપિ તવ નાભિર્ગિરિસુતે
બિલદ્વારં સિદ્ધેર્ગિરિશનયનાનાં વિજયતે ॥ ૭૮॥

નિસર્ગક્ષીણસ્ય સ્તનતટભરેણ ક્લમજુષો
નમન્મૂર્તેર્નારીતિલક શનકૈસ્ત્રુટ્યત ઇવ ।
ચિરં તે મધ્યસ્ય ત્રુટિતતટિનીતીરતરુણા
સમાવસ્થાસ્થેમ્નો ભવતુ કુશલં શૈલતનયે ॥ ૭૯॥

કુચૌ સદ્યઃસ્વિદ્યત્તટઘટિતકૂર્પાસભિદુરૌ
કષન્તૌ દોર્મૂલે કનકકલશાભૌ કલયતા ।

તવ ત્રાતું ભઙ્ગાદલમિતિ વલગ્નં તનુભુવા
ત્રિધા નદ્ધં દેવિ ત્રિવલિ લવલીવલ્લિભિરિવ ॥ ૮૦॥

ગુરુત્વં વિસ્તારં ક્ષિતિધરપતિઃ પાર્વતિ નિજા-
ન્નિતમ્બાદાચ્છિદ્ય ત્વયિ હરણરૂપેણ નિદધે ।
અતસ્તે વિસ્તીર્ણો ગુરુરયમશેષાં વસુમતીં
નિતમ્બપ્રાગ્ભારઃ સ્થગયતિ લઘુત્વં નયતિ ચ ॥ ૮૧॥

કરીન્દ્રાણાં શુણ્ડાન્ કનકકદલીકાણ્ડપટલી-
મુભાભ્યામૂરુભ્યામુભયમપિ નિર્જિત્ય ભવતી ।
સુવૃત્તાભ્યાં પત્યુઃ પ્રણતિકઠિનાભ્યાં ગિરિસુતે
વિજિગ્યે જાનુભ્યાં વિબુધકરિકુમ્ભદ્વયમસિ ॥ ૮૨॥

પરાજેતું રુદ્રં દ્વિગુણશરગર્ભૌ ગિરિસુતે
નિષઙ્ગૌ જઙ્ઘે તે વિષમવિશિખો બાઢમકૃત ।
યદગ્રે દૃશ્યન્તે દશશરફલાઃ પાદયુગલી-
નખાગ્રચ્છદ્માનઃ સુરમકુટશાણૈકનિશિતાઃ ॥ ૮૩॥

શ્રુતીનાં મૂર્ધાનો દધતિ તવ યૌ શેખરતયા
મમાપ્યેતૌ માતઃ શિરસિ દયયા ધેહિ ચરણૌ ।
યયોઃ પાદ્યં પાથઃ પશુપતિજટાજૂટતટિની
યયોર્લાક્ષાલક્ષ્મીરરુણહરિચૂડામણિરુચિઃ ॥ ૮૪॥

નમોવાકં બ્રૂમો નયનરમણીયાય પદયો-
સ્તવાસ્મૈ દ્વન્દ્વાય સ્ફુટરુચિરસાલક્તકવતે ।
અસૂયત્યત્યન્તં યદભિહનનાય સ્પૃહયતે
પશૂનામીશાનઃ પ્રમદવનકઙ્કેલિતરવે ॥ ૮૫॥

મૃષા કૃત્વા ગોત્રસ્ખલનમથ વૈલક્ષ્યનમિતં
લલાટે ભર્તારં ચરણકમલે તાડયતિ તે ।
ચિરાદન્તઃશલ્યં દહનકૃતમુન્મૂલિતવતા
તુલાકોટિક્વાણૈઃ કિલિકિલિતમીશાનરિપુણા ॥ ૮૬॥

હિમાનીહન્તવ્યં હિમગિરિનિવાસૈકચતુરૌ
નિશાયાં નિદ્રાણં નિશિ ચરમભાગે ચ વિશદૌ ।
વરં લક્ષ્મીપાત્રં શ્રિયમતિસૃજન્તૌ સમયિનાં
સરોજં ત્વત્પાદૌ જનનિ જયતશ્ચિત્રમિહ કિમ્ ॥ ૮૭॥

પદં તે કીર્તીનાં પ્રપદમપદં દેવિ વિપદાં
કથં નીતં સદ્ભિઃ કઠિનકમઠીકર્પરતુલામ્ ।
કથં વા બાહુભ્યામુપયમનકાલે પુરભિદા
યદાદાય ન્યસ્તં દૃષદિ દયમાનેન મનસા ॥ ૮૮॥

નખૈર્નાકસ્ત્રીણાં કરકમલસંકોચશશિભિ-
સ્તરૂણાં દિવ્યાનાં હસત ઇવ તે ચણ્ડિ ચરણૌ ।
ફલાનિ સ્વઃસ્થેભ્યઃ કિસલયકરાગ્રેણ દદતાં
દરિદ્રેભ્યો ભદ્રાં શ્રિયમનિશમહ્નાય દદતૌ ॥ ૮૯॥

દદાને દીનેભ્યઃ શ્રિયમનિશમાશાનુસદૃશી-
મમન્દં સૌન્દર્યપ્રકરમકરન્દમ્ વિકિરતિ ।
તવાસ્મિન્ મન્દારસ્તબકસુભગે યાતુ ચરણે
નિમજ્જન્મજ્જીવઃ કરણચરણઃ ષટ્ચરણતામ્ ॥ ૯૦॥

પદન્યાસક્રીડાપરિચયમિવારબ્ધુમનસઃ
સ્ખલન્તસ્તે ખેલં ભવનકલહંસા ન જહતિ ।
અતસ્તેષાં શિક્ષાં સુભગમણિમઞ્જીરરણિત-
ચ્છલાદાચક્ષાણં ચરણકમલં ચારુચરિતે ॥ ૯૧॥

ગતાસ્તે મઞ્ચત્વં દ્રુહિણહરિરુદ્રેશ્વરભૃતઃ
શિવઃ સ્વચ્છચ્છાયાઘટિતકપટપ્રચ્છદપટઃ ।
ત્વદીયાનાં ભાસાં પ્રતિફલનરાગારુણતયા
શરીરી શૃઙ્ગારો રસ ઇવ દૃશાં દોગ્ધિ કુતુકમ્ ॥ ૯૨॥

અરાલા કેશેષુ પ્રકૃતિસરલા મન્દહસિતે
શિરીષાભા ચિત્તે દૃષદુપલશોભા કુચતટે ।
ભૃશં તન્વી મધ્યે પૃથુરુરસિજારોહવિષયે
જગત્ત્રાતું શમ્ભોર્જયતિ કરુણા કાચિદરુણા ॥ ૯૩॥

કલઙ્કઃ કસ્તૂરી રજનિકરબિમ્બં જલમયં
કલાભિઃ કર્પૂરૈર્મરકતકરણ્ડં નિબિડિતમ્ ।
અતસ્ત્વદ્ભોગેન પ્રતિદિનમિદં રિક્તકુહરં
વિધિર્ભૂયો ભૂયો નિબિડયતિ નૂનં તવ કૃતે ॥ ૯૪॥

પુરારાતેરન્તઃપુરમસિ તતસ્ત્વચ્ચરણયોઃ

સપર્યામર્યાદા તરલકરણાનામસુલભા ।
તથા હ્યેતે નીતાઃ શતમખમુખાઃ સિદ્ધિમતુલાં
તવ દ્વારોપાન્તસ્થિતિભિરણિમાદ્યાભિરમરાઃ ॥ ૯૫॥

કલત્રં વૈધાત્રં કતિકતિ ભજન્તે ન કવયઃ
શ્રિયો દેવ્યાઃ કો વા ન ભવતિ પતિઃ કૈરપિ ધનૈઃ ।
મહાદેવં હિત્વા તવ સતિ સતીનામચરમે
કુચાભ્યામાસઙ્ગઃ કુરવકતરોરપ્યસુલભઃ ॥ ૯૬॥

ગિરામાહુર્દેવીં દ્રુહિણગૃહિણીમાગમવિદો
હરેઃ પત્નીં પદ્માં હરસહચરીમદ્રિતનયામ્ ।
તુરીયા કાપિ ત્વં દુરધિગમનિઃસીમમહિમા
મહામાયા વિશ્વં ભ્રમયસિ પરબ્રહ્મમહિષિ ॥ ૯૭॥

કદા કાલે માતઃ કથય કલિતાલક્તકરસં
પિબેયં વિદ્યાર્થી તવ ચરણનિર્ણેજનજલમ્ ।
પ્રકૃત્યા મૂકાનામપિ ચ કવિતાકારણતયા
કદા ધત્તે વાણીમુખકમલતામ્બૂલરસતામ્ ॥ ૯૮॥

સરસ્વત્યા લક્ષ્મ્યા વિધિહરિસપત્નો વિહરતે
રતેઃ પાતિવ્રત્યં શિથિલયતિ રમ્યેણ વપુષા ।
ચિરં જીવન્નેવ ક્ષપિતપશુપાશવ્યતિકરઃ
પરાનન્દાભિખ્યમ્ રસયતિ રસં ત્વદ્ભજનવાન્ ॥ ૯૯॥

પ્રદીપજ્વાલાભિર્દિવસકરનીરાજનવિધિઃ
સુધાસૂતેશ્ચન્દ્રોપલજલલવૈરર્ઘ્યરચના ।
સ્વકીયૈરમ્ભોભિઃ સલિલનિધિસૌહિત્યકરણં
ત્વદીયાભિર્વાગ્ભિસ્તવ જનનિ વાચાં સ્તુતિરિયમ્ ॥ ૧૦૦॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ સૌન્દર્યલહરી સમ્પૂર્ણા ॥

॥ ૐ તત્સત્ ॥

(અનુબન્ધઃ Addendum
સમાનીતઃ પદ્ભ્યાં મણિમુકુરતામમ્બરમણિ-

ર્ભયાદાસ્યાદન્તઃસ્તિમિતકિરણશ્રેણિમસૃણઃ ।
(variations ભયાદાસ્ય સ્નિગ્ધસ્તિમત, ભયાદાસ્યસ્યાન્તઃસ્તિમત)
દધાતિ ત્વદ્વક્ત્રંપ્રતિફલનમશ્રાન્તવિકચં
નિરાતઙ્કં ચન્દ્રાન્નિજહૃદયપઙ્કેરુહમિવ ॥ ૧૦૧ ॥

સમુદ્ભૂતસ્થૂલસ્તનભરમુરશ્ચારુ હસિતં
કટાક્ષે કન્દર્પઃ કતિચન કદમ્બદ્યુતિ વપુઃ ।
હરસ્ય ત્વદ્ભ્રાન્તિં મનસિ જનયન્તિ સ્મ વિમલાઃ
variations જનયામાસ મદનો, જનયન્તઃ સમતુલાં, જનયન્તા સુવદને
ભવત્યા યે ભક્તાઃ પરિણતિરમીષામિયમુમે ॥ ૧૦૨ ॥

નિધે નિત્યસ્મેરે નિરવધિગુણે નીતિનિપુણે
નિરાઘાતજ્ઞાને નિયમપરચિત્તૈકનિલયે ।
નિયત્યા નિર્મુક્તે નિખિલનિગમાન્તસ્તુતિપદે
નિરાતઙ્કે નિત્યે નિગમય મમાપિ સ્તુતિમિમામ્ ॥ ૧૦૩ ॥

)

Notes:
The Saundaryalahari, a devotional poem of one hundred hymns, is ascribed to the great teacher Shankaracharya. The poem is divided into two parts; the first part, comprised of verses 1 through 41, is called the Anandalahari, or Wave of Bliss, and verses 42 through 100 comprise the Saundaryalahari, or Wave of Beauty. There are three additional verses, found as verses 101 through 103, which are considered to be interpolations of other scholars, but are included in recensions of the whole work. The hymn, written in the shikhariNI metre, extols in the Anandalahari, the dynamic aspect of Brahman, as Shakti, manifestations for worship, and the modes of internal meditation. The second part, the Saundaryalahari, contains a magnificent exposition of the beauties of the charming form of the Divine Mother.

The exact number of verses of the Saundaryalahari is debated. Some versions give only one hundred verses, while others add three or four more verses to this number. In editing this electronic edition I cross-referenced the verses herein against ten printed editions, compared the texts, and arrived at one hundred and three verses. This number is what the majority of the printed editions have also listed, so this number is what I shall give as

well. Thus, this edition contains all verses traditionally given in the Saundaryalahari. The order of the verses also varies according to some editions. Again I compared the order to other editions and the order given herein is the order which the majority of those editions have set the verses in.

Encoded and proofread by: Anshuman Pandey (16 April 1996) pandey at umich.edu

Reproofread by Sunder Hattangadi

*Saundaryalahari*

pdf was typeset on April 8, 2025

Please send corrections to *sanskrit@cheerful.com*